इति राजनिर्घण्टः ॥ (यथा गारुड़े १८६ अध्याये ।
"ब्रह्मदण्डी तु पुष्येण स्नाने पाने वशीकरा ॥")

ब्रह्मदत्तः, पुं, इक्ष्वाकुवंशीयराजविशेषः । तत्पर्य्यायः । ब्रह्मक्रतुः २ । इति हेमचन्द्रः । ३ । ३५८ ॥ (यथा महाभारते । २ । ८ । २० ।
"ब्रह्मदत्तस्त्रिगर्त्तश्च राजोपरिचरस्तथा ॥"
स्वनामख्यातो नीपपुत्रः । यथा, भागवते । ६ । २१ । २५ ।
पारस्य तनयो नीपस्तस्य पुत्त्रशतं त्वभूत् ।
स कृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ॥"
ब्रह्मणा दत्त इति विग्रहे वाच्यलिङ्गः । यथा, रामायणे । ३ । १८ । ३८ ।
"अमोघा इषवश्चेमे ब्रह्मदत्ताः सुतेजसः ।
दत्ता मह्यं महेन्द्रेण तूणौ चाक्षयसायकौ ॥")

ब्रह्मदर्भा, स्त्री, (ब्रह्मणे हितो दर्भो यस्याः ।) यमानिका । इत्यमरः । २ । ४ । १४५ ॥ (यथास्याः पर्य्यायः ।
"यमानिकोग्रगन्धा च ब्रह्मदर्भाजमोदिका ।
सेवोक्ता दीप्यका दीप्या तथा स्यादुयवसा-
ह्वया ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

ब्रह्मदारु, स्त्री, (ब्रह्मणो ब्राह्मणस्य हितकरो दारुः ।) स्वनामख्याताश्वत्थाकारवृक्षविशेषः ॥ तत्पर्य्यायः । नूदः २ पूषः ३ क्रमुकः ४ ब्रह्मण्यः ५ तूलम् ६ । इत्यमरः । २ । ४ । ४१ ॥ पलाशिकम् ७ । इति वाचस्पतिः ॥ तलम् ८ । इति भरतः ॥ पूगः ९ यूषः १० । इति शब्दरत्नावली ॥ (क्रमुकार्थे पर्य्यायो यथा,
"तूतः स्यूलश्च पूगश्च क्रमुको ब्रह्मदारु च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

ब्रह्मदैत्यः, पुं, (ब्रह्मा ब्राह्मणरूपी दैत्यः ।) प्रेतयोनिप्राप्तब्राह्मणः । इत्यैतिह्यम् ॥

ब्रह्मनालं, स्त्री, (ब्रह्मणो ब्रह्मलोकप्राप्तेर्नालमिव ।) काश्यां चक्रतीर्थस्य पूर्व्वभागे पितामहेश्वरलिङ्गस्याधस्तीर्थविशेषः यथा,—
"पितामहेश्वरं लिङ्गं ब्रह्मनालोपरिस्थितम् ।
पूजयित्वा नरो भक्त्या ब्रह्मलोकमवाप्नुयात् ॥
ब्रह्मस्रोतःसमीपे तु कृतं कर्म्म शुभाशुभम् ।
परामक्षयतामेति शुभमेव ततश्चरेत् ॥
अनल्पमपि यत् कर्म्म कृतमत्र शुभाशुभम् ।
प्रलयेऽपि न तस्यास्ति प्रलयो मुनिसत्तम ! ॥
नाभितीर्थमिदं प्रोक्तं नाभीभूतं यतः क्षितेः ।
अपि ब्रह्माण्डगोलस्य नाभिरेषा शुभोदया ॥
सा मणिकर्णिकेत्येयं नाभिगाम्भीर्य्यभूमिका ।
ब्रह्माण्डगोलकं सर्व्वं यस्यामेति लयोदयम् ॥
ब्रह्मनालं परं तीर्थं त्रिषु लोकेषु विश्रुतम् ।
तत्सङ्गमे नरः स्नातः कोटिजन्ममलं हरेत् ॥
ब्रह्मनाले पतेद्देषामपि कीकसमात्रकम् ॥
ब्रह्माण्डमण्डपान्तस्ते न विशन्ति कदाचन ॥"
इति स्कन्दपुराणे काशीखण्डे विन्दुमाधवाग्निविन्दुसंवादे वैष्णवतीर्थमाहात्म्यं नाम ६१ अः ॥

ब्रह्मनिर्व्वाणं, स्त्री, (ब्रह्मणि परब्रह्मणि निर्व्वाणं लयः ।) ब्रह्मणि निर्वृत्तिः । यथा, श्रीभगवद्गीतायाम् । २ । ७२ ।
"एषा ब्राह्मी स्थितिः पार्थ ! नैनां प्राप्य
विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्व्वाणमृच्छति ॥"

ब्रह्मपत्रं, स्त्री, (ब्रह्मणस्तदाख्यया प्रसिद्धस्य वृक्षस्य पत्रम् । पलाशपत्रम् । यथा,—
"भोजनं ब्रह्मपत्रेषु कथयालोचनं हरेः ।
दर्शनं वैष्णवानाञ्च महापातकनाशनम् ॥"
इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये ११८ अः ॥

ब्रह्मपर्णी, स्त्री, (ब्रह्मेव विस्तीर्णानि आमूलं स्थितानि पत्राणि यस्याः ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥

ब्रह्मपवित्रः, पुं, (ब्रह्मणि वेदोक्तकर्म्मणि पवित्रः ।) कुशः । इति राजनिर्घण्टः ॥

ब्रह्मपादपः, पुं, (ब्रह्मा तदाख्यया प्रसिद्धः पादपः ।) पलाशवृक्षः । इति हेमचन्द्रः । ४ । २०२ ॥

ब्रह्मपुत्त्रः, पुं, विषभेदः । इत्यमरः । १ । ८ । १० ॥ तस्य लक्षणं यथा,—
"वर्णतः कपिलो यः स्यात्तथा भवति सारकः ।
ब्रह्मपुत्त्रः स विज्ञेयो जायते मलयाचले ॥"
इति भावप्रकाशः ॥
(पर्य्यायोऽस्य यथा,
"काकोली गरलः चूड़ो वत्सनाभः प्रदीपनः ।
शौल्किकेयो ब्रह्मपुत्त्रो विषं स्याद्गरलो विषः ॥"
इति वैद्यकरत्नमालायाम् ॥
ब्रह्मणः पुत्त्रः । सत्यम् । धर्म्मः । मरीच्यादिः ॥ मनुः । यथा मार्कण्डेये । ९४ । ११ ।
"मन्वन्तरे च दशमे ब्रह्मपुत्त्रस्य धीमतः ।
सुखासीना निरुद्धाश्च त्रिःप्रकाराः सुराः
स्मृताः ॥"
नारदः । वशिष्ठः ॥) क्षेत्रभेदः । नदभेदः । इति मेदिनी । रे, २८५ ॥ शेषस्य पर्य्यायः । अमोघानन्दनः २ लौहित्यः ३ लोहितः ४ । इति शब्दरत्नावली ॥ * ॥ अस्य नदस्योत्पत्तिमाहात्म्ये यथा,—

सगर उवाच ।

"अमोघायां कथं जज्ञे लौहित्यो ब्रह्मणः सुतः ।
कथं शान्तनुभार्य्यायां रेतः स कमलासनः ॥
प्रारब्धेणेयपुत्त्रो वा कथं जज्ञे पितामहात् ।
तत् सर्व्वं श्रोतुमिच्छामि कथयस्व द्विजोत्तम ! ॥

और्व्व उवाच ।

शृणु त्वं नृपशार्दूल ! कथयामि महत्तरम् ।
आख्यानं ब्रह्मपुत्त्रस्य लौहित्यस्य महात्मनः ॥
हरिवर्षे महावर्षे शान्तनुर्नाम नामतः ।
मुनिरासीन्महाभागो ज्ञानवान् सुतपोधनः ॥
तस्य भार्य्या महाभागा अमोघाख्या महासती ।
हिरण्यगर्भस्य मुनेस्तृणवृन्दाश्रमोद्भवा ॥
तया सार्द्धं स कैलासमर्य्यादापर्व्वतेऽवसत् ।
लौहित्याख्यस्य सरसस्तीरे वै गन्धमादने ॥
एकदा स तपोनिष्ठो निजपुष्यादिगोचरे ।
जगाम वनमध्यन्तु चिन्वन् बहुफलानि च ॥
तस्मिन्नवसरे ब्रह्मा सर्व्वलोकपितामहः ।
तत्राजगाम यत्रास्ति अमोघा शान्तनोः प्रिया ॥
तां दृष्ट्वा देवगर्भाभां युवतीमतिसुन्दरीम् ।
मोहितो मदनेनाशु तथाभूद्धूषितेन्द्रियः ॥
उदीरितेन्द्रियो भूत्वा जिघृक्षुस्तां महासतीम् ।
अथाधावत्तदा ब्रह्मा सम्मुखो मदनार्द्दितः ॥
धावमानं विधातारं दृष्ट्वामोघा महासती ।
मैवं मैवमिति प्रोक्ता पर्णशालां व्यलीयत ॥
इदञ्चोवाच धातारममोघा कुपिता तदा ।
पर्णशालान्तरगता द्वारमावृत्य तत्क्षणात् ॥
अकार्य्यं न मया कार्य्यं मुनिपत्न्या विगर्हितम् ।
बलात् प्रमथ्या चाहं तत्त्वया त्वाञ्च शपाम्यहम् ॥
अमोघया चैवमुक्ते विधातुश्च तदा नृप ! ।
रेतश्चस्कन्द च तदैवाश्रमे शान्तनोर्मुनेः ॥
च्युते रेतसि धातापि हंसयानं समास्थितः ।
लज्जयातिपरीतात्मा द्रुतं वै स्वाश्रमं ययौ ॥ * ॥
गते वेधसि शान्तनुर्निजमाश्रममागतः ।
आगत्य दृष्ट्वा हंसानां पदक्षोभं तथा भुवि ॥
तेजश्च पतितं भूमौ विधातुर्ज्वलनोपमम् ।
अमोघां परिपप्रच्छ पर्णशालान्तरस्थिताम् ॥
किमेतदत्र सुभगे ! प्रवृत्तं दृश्यते तु यत् ।
पक्षिणाञ्च पदक्षोभस्तेजश्चेदञ्च कीदृशम् ॥
सा तस्य वचनं श्रुत्वा शान्तनुं मुनिसत्तमम् ।
अमर्षितेव न्यगदद्राकुला विकलानना ॥
हंसयुक्तस्यन्दनेन कोऽप्यागत्य चतुर्मुखः ।
कमण्डलुकरो भीरु रतिं मां समयाचत ॥
ततो मया भर्त्सितः स कुटजान्तरलीनया ।
प्रच्याव्य तेजः स यातो मया शापभयार्द्दितः ॥
कुरु तत्र प्रतीकारं यदि शक्नोषि शान्तनो ! ।
न हि मां धर्षणां सोढुं कश्चित् शक्नोति जीव-
भृत् ॥
स तस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागतः ।
इति निश्चित्य मनसा तत्र ध्यानपरोऽभवत् ॥
दिव्यज्ञानेन स ज्ञात्वा देवकार्य्यमुपस्थितम् ।
तीर्थावतारणञ्चापि हिताय जगतां मुनिः ।
ज्ञात्वोदर्कं चिन्तयित्वा स्वभार्य्यामिदमब्रवीत् ॥
इदं तेजो ब्रह्मणस्त्वं पिबामोघे ! ममाज्ञया ।
हिताय सर्व्वजगतां देवकार्य्यार्थसिद्धये ॥
भवत्या निकटं ब्रह्मा स्वयमेव समागतः ।
त्वामप्राप्य स महात्मा आवयोः स समर्प्य च ।
गतो निजास्पदं तत्त्वं धर्त्तुमर्हसि मद्वचः ॥
तत् श्रुत्वा शान्तनोर्वाक्यममोघातीव लज्जिता ।
शान्तयन्तीव तं प्राह पतिं नत्वा महासती ॥
नान्यस्य तेजो धास्यामि न चेत्ते विमनस्कता ।
अवश्यं यदि कर्त्तव्यं पीत्वा त्वं मयि चोत्सृज ॥
ततस्तस्या वचः श्रुत्वा युक्तं तथ्यञ्च शान्तनुः ।
स्वयं पीत्वा च तत्तेजस्तस्या गर्भे व्यसेचयेत् ॥
संक्रामितैः शान्तनुना तेजोभिर्ब्रह्मणः सती ।
गर्भं दधानामोघाख्या हिताय जगतां ततः ॥
तस्यां काले तु संप्राप्ते संजातो जलसञ्चयः ।
तन्मध्ये तनयश्चापि नीलवासाः किरीटधृक् ॥